M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1552

Title : Vedartha Prakasa

1552

In Complete

	Vedartha Prakasha		: Title
:	:	Madhav	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1552 :	:	Pages 136 - 26	: Remarks

वृति सएवायंसमहोतरूपइत्यर्थः अथद्वितीयामाह परेणतंतुपरिषिच्यमानं अंतरादित्येमनसाचरंतं देवानांहृद
यंब्रह्मान्वविंददिति ब्रह्माप्रजापतिर्देवानामिंद्रादीनांहृदयस्थितंपरमात्मानमन्वविंदत्अन्विष्यलब्धवान् कीदृशं तं
तंतुपरेणाविच्छिन्नस्ययज्ञस्यपरस्तात्फलदशायांपरिषिंच्यमानंवृष्टिरूपेणपरितःषिच्यमानं अंतरादित्येआदित्यमंडल
मध्येमनसासंकल्पमात्रेणाचरंतं अथतृतीयामाह ब्रह्मेतब्रह्मणउज्जभार अर्कंश्चोततंसरीरस्यमध्येइति।
ब्रह्माचतुर्मुखःप्रजापतिः ब्रह्मणोवेदस्यसंकाशात्समहोतत्स्वरूपंउज्जभारसारत्वेनोध्धृतवान् कीदृशंअर्कंसू
र्यरूपेणावस्थितं सरीरस्यमध्येजलस्यमध्येरश्मिद्वाराप्रविश्यश्चोततंवर्षयंतं अथचतुर्थीमाह आयस्मिन्सप्त
रवः मेहंतिवहुलांश्रियं वह्वश्वामिंद्रगोमति यस्मिन्समहोतरूपेआदित्येपेरवः वृष्टिप्रदानेनलोकस्य
पातारःसप्तसंख्याकारश्मयःआश्रिताः रश्मिसप्तकंचसाकंजनांसप्तथमाहुरेकजमित्यत्रप्रपंचितं तेचसप्त
रश्मयोवहुलांश्रियंप्रधानभूतांधनादिसंपदंमेहंति वृष्टिसेचनद्वारेणसंपादयंति हेइंद्रसमहोतदेवरूपप
रमेश्वरवह्वश्वांवहुभिरश्वैरुपेतांगोमतींवहुभिर्गोभिरुपेतानांश्रियंप्रयच्छेतिशेषः अथपंचमीमाह अच्यु
वि२ तांवहुलांश्रियं सहरिर्वसूत्तमः पेरुरिंद्रायपिन्वहरिः पापहरणशीलोवसूत्तमः अतिशयेनधनस्यलब्धा।
पेरुःपालकः कीदृशींश्रियं अच्युतांविनाशरहितां वहुलांगवाश्वादिभिःप्रभूतां अथषष्ठीमाह व

तै२

वृति स एवायं सप्तहोतृरूप इत्यर्थः अथ द्वितीयामाह परेणतं तु परिषिच्यमानं अंतरादित्ये मनसा चरंतं देवानां हृद
यं ब्रह्मान्वविंददिति ब्रह्मा प्रजापतिर्देवानामिंद्रादीनां हृदयस्थितं परमात्मानमन्वविंदत् अन्विष्य लब्धवान् कीदृशं तं
तु परेणाविच्छिन्नस्य यज्ञस्य परस्तात्फलदशायां परिषिंच्यमानं वृष्टिरूपेण परितः षिच्यमानं अंतरादित्ये आदित्यमंडल
मध्ये मनसा संकल्पमात्रेण चरंतं अथ तृतीयामाह ब्रह्मैतद्ब्रह्मण उज्जभार अर्कं श्चोततं शरीरस्य मध्य इति।
ब्रह्मा चतुर्मुखः प्रजापतिः ब्रह्मणो वेदस्य सकाशात् सप्तहोतृस्वरूपं उज्जभार सारत्वेनोद्धृतवान् कीदृशं अर्कं सू
र्यरूपेणावस्थितं शरीरस्य मध्ये जलस्य मध्ये रश्मिद्वारा प्रविश्य श्चोततं वर्षयंतं अथ चतुर्थीमाह आयस्मिन्सप्त
रवः मदंति बहुलां श्रियं बहुश्चामिंद्र गोमति यस्मिन्सप्तहोतृरूपे आदित्ये परवः वृष्टिप्रदानेन लोकस्य
पातारः सप्तसंख्याकाररश्मयः आश्रिताः रश्मिसप्तकं च साकंजानां सप्तथमाहुरेकजमित्यत्र प्रपंचितं ते च सप्त
रश्मयो बहुलां श्रियं प्रधानभूतां धनादिसंपदं मदंति वृष्टिसेचनद्वारेण संपादयंति हे इंद्र सप्तहोतृदेवरूप प
रमेश्वर बहुश्चां बहुभिरश्वैरुपेतां गोमतीं बहुभिर्गोभिरुपेतानां श्रियं प्रयच्छेति शेषः अथ पंचमीमाह अच्यु
वि२ तां बहुलां श्रियं सहहरिर्वसुत्तमाः पेरुरिंद्राय पिन्वहरिः पापहरणशीलो वसूनां उत्तमः अतिशयेन धनस्य लब्धा।
पेरुः पालकः कीदृशीं श्रियं अच्युतां विनाशरहितां बहुलां गवाश्वादिभिः प्रभूतां अथ षष्ठीमाह ब

ते२

विनि॰ ॥१३॥ कृष्णापिंगोमती अच्युताबहुलाः श्रियं मह्यमिंद्रो नियच्छत्विति इंद्रः परमैश्वर्यादियुक्तः स सप्तहोता देवः स्वस्मभ्यम्॥
अथ सप्तमीमाह शतं शता अस्य युक्ता हरीणां अर्वाङायातु वसुभी रश्मिरिंद्रः प्रमंहमाणो बहुलाः श्रियं रश्मि
रिंद्रः सविता मे नियच्छतु इति अस्य आदित्यरूपस्य सप्तहोतृदेवस्य हरीणां अंधकारहरणशीलानां रश्मीनां शतानि शतसं
ख्याकानि शतानि तत्संख्याकानीत्यर्थः युक्तानि संपादितानि इंद्रः परमैश्वर्ययुक्तो रश्मिः बहुविधरश्मियुक्तो आ
दित्यः वसुभिः धनैः सह अर्वाङायातु आभिमुख्येनागच्छतु आगतश्च सविता बहुलाः श्रियं प्रशस्तां पनादिसंप
दं मे मह्यं नियच्छतु निरां ददातु कीदृशः सविता प्रमंहमाणः अस्मदीयस्तुतिभिः प्रकर्षेण वर्द्धमानः रश्मिः ब
हुविधरश्मियुक्तः इंद्रः परमैश्वर्ययुक्तः अथाष्टमीमाह घृतं तेजो मधुमदिंद्रियं मय्ययमग्निर्दधात्विति।
अयं स सप्तहोता देवः अग्न्यात्मकः सन् मयि यजमाने मधु घृतं मधुरसोपेतं घृतादि द्रव्यं तेजः कांतिरिंद्रियं चक्षुरादि सा
मर्थ्यं च दधातु संपादधातु संपादयतु अथ नवमीमाह हरिः पतंगः पटरी सुपर्णः दिविक्षयो नभसा यएति।
स न इंद्रः कामवरं ददात्विति हरिः अंधकारहरणशीलः पतंगः सूर्यरूपः पटरी तेजः पटलवान् सुवर्णः प ॥१३॥
क्षिसदृशः दिविक्षयः स्वर्गनिवासीयः सप्तहोता देवः नभसा आकाशमार्गेण विगच्छति स देवो नोस्माकं काम
वरं कामानां मध्ये श्रेष्ठं ददातु अथ दशमीमाह पंचारं चक्रं परिवर्तते पृथु हिरण्यज्योतिः सररस्य मध्ये॥

अजस्रं ज्योतिर्नभसा सर्पदेति स न इंद्रः कामवरं ददात्विति ऋतुपंचात्मका अरा यस्य कालचक्रस्य तत्पंचारं॥
पृथु विस्तृतं वर्षं संवत्सरात्मकं कालचक्रं परिवर्तते सरीरस्य मध्ये मेघवर्त्ति जलस्य मध्ये हिरण्यज्योतिः रश्मिसं
चारेण विद्युद्रूपपरिणामे सति सुवर्णसमानं ज्योतिर्यस्य मंडलस्य तद्धिरण्यज्योतिः तादृशं ज्योतिरादित्यमंड
लं संवत्सरचक्रं निष्पादकं अजस्रं निरंतरं नभसा आकाशमार्गेण सर्पदेति शनैः संचरन् गच्छति स ज्योतिर्मंडला
मे त्मा नोस्माकं कामवरं ददातु अथैकादशीमाह सप्त युंजंति रथमेकचक्रं एको अश्वो वहति सप्तनामा त्रिनाभिचक्र
मजरमनर्वं येनेमा विश्वा भुवनानि तस्थुरिति सप्तसंख्याकाः साकं जन्मानि सप्तोक्ता रश्मिविशेषाः अश्व
सदृशाः एकचक्रं एकप्रकारपरिवर्त्ती कालचक्रं युक्तं प्रवर्त्तयंति तदेव स्पष्टीक्रियते सप्तनामा सप्तसंख्यानि ना
मानि नमनयोग्यानि वस्तूनि रश्मिरूपाणि यस्यासौ सप्तनामा अश्वो व्यापकः एकः सूर्यः तत्कालचक्रं वहति की
दृशं चक्रं [illegible] त्रिनाभि त्रितिस्रः सत्वरजस्तमो गुणरूपा भूतभविष्यद्वर्त्तमानरूपा वा नाभयो यस्य तत् त्रिनाभि अ
जरं विनाशरहितं न हि कालः संसारमध्ये कदाचिद्विनश्यति अर्वा विरोधी विनाशकः स्यात् व्यावाअर्वेति श्रु
रो तः तद्रहितं न हि कालचक्रस्य कश्चिद्विनाशकोऽस्ति येन कालचक्रेण इमा विश्वा भुवनानि दृश्यमानानि सर्वा
णि भूतजातानि तिष्ठंति सुखेन वर्त्तंते तस्य कालचक्रस्य निर्वाहको यः स सप्तहोता देव आदित्यः अथ द्वाद

त्रित्रि०
॥१४॥

शीमाह भद्रं पश्यंत उपसेदुरग्रे तपो दीक्षामृषयः स्वर्विदः ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभिसंनमंत्विति स्व
र्विदः स्वर्गमार्गाभिज्ञाः ऋषयः भद्रं कल्याणसप्तहोतृरूपमादित्यं पश्यंतः प्राप्यत्वेन निश्चिन्वंतस्तपो नशनादिरूपं दीक्षां नि
यमविशेषं च उपसेदुः अनुष्ठितवंतः ततः आदित्यसकाशात् क्षत्रं क्षतात् त्राणं अनिष्टनिवारणं बलं शरीरशक्तिः ओ
जः कांतिश्चेत्येतत्सर्वं जातं संपन्नं तस्मात् क्षत्रादिकर्तृत्वं यं अस्मै यजमानाय देवाः अभिसंनमंतु अभितः संपादयंतु॥
अथ त्रयोदशीमाह श्वेतं रश्मिं बोभुज्यमानं अपां नेतारं भुवनस्य गोपां इंद्रं निचिक्युः परमे व्योमन्निति प
रमे व्योमन् उत्कृष्टे हृदयाकाशे इंद्रं परमैश्वर्ययुक्तं सप्तहोतृदेवमादित्यं निचिक्युः निश्चितवंतो ध्यातवंत इत्यर्थः॥
कीदृशं श्वेतं प्रकाशरूपत्वेन शुक्लवर्णं रश्मिं रश्मियुक्तं बोभुज्यमानं सर्वैः प्राणिभिः वृष्टिद्वारेण पुनः पुनः भु
ज्यं एतदेव स्पष्टी क्रियते अपां नेतारं आदित्याज्जायते वृष्टिरिति स्मृत्या सूर्यो जनस्य नेता तादृशं भुवन
स्य गोपां भुवनस्य पालकं अथ चतुर्दशीमाह रोहिणीः पिंगला एकरूपाः क्षरंतीः पिंगला एकरूपाः श ॥१४॥
तं सहस्राणि प्रयुतानि नाव्यानामिति रोहिणीः रोहितवर्णाः पिंगलाः पिंगलवर्णाश्च या आपः तत्तद्र
श्मिसंबंधेन बहुधा विदृश्यंते ताः सर्वा अपि सप्तहोतृरूपस्यादित्यस्य रश्मिसंबंधे सति भेदेन नानारू
पत्वं परित्यज्य एकरूपा भवंति तथा क्षरंतीः वृष्टिरूपेण भूमौ पतंत्यः ताः पिंगलादिवर्णाः एकरूपा भ

वंति वृष्टिबाहुल्येन च नाव्यानां नावा तरणीयानां अपां शतं सहस्राणि प्रयुतानि शतसंख्याकबहुविधा सहस्रसंख्याकं
बहुपालक्ष्यसंख्याकं संपद्यते वृष्टिकाले तत्र तत्रानेकप्रवाहाः भवंति तदेतत्सर्वं सप्तहोतृमाहात्म्यं अथ पंचदशी
माह अयं पः श्वेतो रश्मिः परि सर्वमिदं जगत् प्रजां पशूंश्च धनानि अस्माकं ददात्विति यः आदित्यः श्वेतवर्णो
रश्मियुक्तोस्ति सोयं सर्वं जगत् परिव्याप्य वर्द्धमानो स्माकं प्रजादिकं ददातु अथ षोडशीमाह श्वेतो रश्मिः परि
सर्वं बभूव सुवन्मह्यं पशून् विश्वरूपान् श्वेतः शुक्लवर्णो रश्मिः रश्मियुक्तः आदित्यः सर्वं जगत् परिबभूव परितो
व्याप्तवान् तादृश आदित्यो मह्यं विश्वरूपान् गोमहिष्यादिरूपेण बहुधान् पशून् सुवन् सोतु प्रेरयत्वित्यर्थः अ
थ सप्तदशीमाह पतंगमक्तमसुरस्य मायया हृदा पश्यंति मनसा मनीषिणः समुद्रे अंतः कवयो विचक्षते म
रीचीनां पदमिच्छंति वेधस इति असुरस्य प्राणानुराति ददातीत्यसुरः परमात्मा मायया अनिर्वाच्य शक्त्या अक्तं अभि
व्यक्तं पतंगमादित्यं हृदा मनसा हृत्पुंडरीकगतेन नियमितेनांतःकरणेन मनीषिणो वेदशास्त्राभिज्ञाः महर्षयः प
श्यंति ध्यात्वा साक्षात्कुर्वंति कवयो लौकिकचतुरा तादृशाभियुक्ताः पुरुषाः समुद्रे अंतः समुद्रसमाने अंतरिक्षमध्ये विच
क्षते विशेषेण कथयंति अयमादित्य उदितः मध्याह्ने समागतः इत्यादि व्यवहारं कुर्वंति वेधसो विधातारोनुष्ठा
नं कुशलाः केचिद्यजमानाः मरीचीनां पदं रश्मीनां पदस्थानं आदित्यमिच्छंति आदित्य सायुज्यप्राप्त्यर्थ म

त्रित्रि० नुतिष्ठतीत्यर्थः अथाष्टादशीमाह पतंगोवाचंमनसाबिभर्तितांगंधर्वोवदद्गर्भेअंतः तांद्योतमानांस्वर्यंमनीषां ऋ
॥१५॥ तस्यपदेकवयोनिपांति पतंगआदित्यःमनसास्वकीयेनप्राणिनांवाबिभर्तिधारयतिअंतर्यामिरूपेणवाचंप्रेर
यतीत्यर्थः तथाचपौराणिकाःआहुः यांतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधा
म्नेति तांमादित्यप्रेरितांवाचंगर्भेअंतःशरीरस्यमध्येगंधर्वनामकोवायुरवदद्उच्चारयति गंधान्वहती
तिव्युत्पत्त्यागंधर्वशब्दोवायुमाचष्टे वायुर्हितात्वादिस्थानेषुसंयुक्तोवाचमुच्चारयतितांवायुनोच्चारितांद्यो
तमानांप्रकाशमानांस्वर्यस्वर्गस्यहेतुभूतांमनीषांमनसईशित्रीमाल्हादकरीमित्यर्थः तादृशींवाचंऋत
यज्ञस्याभिज्ञाः ऋतस्यपदेसत्यस्यब्रह्मणःस्थानेनिपांतिनितरांपालयंतिपरब्रह्मविषयाणिवेदवाक्यानि
सर्वदापठतीत्यर्थः तदेतत्सर्वंवाक्प्रेरकस्यादित्यस्यमहात्म्यं अथैकोनविंशीमाह येग्राम्याःपशवोरूपाः।
विरूपाःसंतोबहुधैकरूपाः अग्निस्ताँअग्रेप्रमुमोक्तुदेवः प्रजापतिःप्रजयासंविदानइति येग्राम्याः
शावोग्रामेभवाःगवाःगवादयःविश्वरूपाःजातिभेदेर्बहुविधाःविरूपाःवर्णादिभेदेनविविधाकाराःएवंब ॥१५॥
हुधादृश्यमानाःसंतोपिपुनर्पशुत्वाकारेणएकरूपाःतान्सर्वानग्निरूपाःसप्तहोतादेवःअग्रेप्रमुमोक्तु
प्रथमंतत्तत्स्थानात्प्रमुचतुप्रमच्यास्मभ्यंददातित्यर्थः प्रजापतिश्चस्वकीयायाप्रजयासंविदानःऐक

मत्यंगतोःस्मभ्यंपशूनददातितिषेशी अथविंशीमाह वि तस्के केस्कैयुवमस्मासुनियच्छतं प्रप्रयज्ञपतिंतिरे
ति हेअग्निप्रजापती युवंउभौयुवांस्कके केस्ककेततउपाघपत्येवीतंप्रजननमुसत्तिंअस्मासुनियच्छतंनियमेनसंपा
दयतंतयजमानंप्रप्रतिरअत्यंतप्रकर्षेणवृद्धयत अथैकविंशीमाह येग्राम्याःपशवोविश्वरूपाः विरूपाःसं
तोबहुधैकरूपाः तेषांसप्तानामिहरंतिरस्तु रायस्पोषायसुप्रजास्त्वायसुवीर्यायेति ग्राम्यादिवाव्दाःपूर्ववद्यो
ज्याःतेषांग्राम्यपशूनांसप्तानांगोअश्वाजाविपुरुषगर्दभोष्ट्रमहिषरूपाणांसप्तसंख्यानामिहास्मद्गृहेरंतिःक्री
डास्तु तत्रधनपुष्टिशोभनापत्यत्वशोभनवीर्यायार्थंसंपद्यते अथद्वाविंशीमाह यआरण्याःपशवोविश्व
रूपाः विरूपाःसंतोबहुधैकरूपाः वायुस्ताँअग्रेप्रमुमोक्तु [illegible] देवः प्रजापतिःप्रजयासंवि
दानइति अरण्येभवाःअरण्याःद्विखुराःश्वापदादयः तानारण्याधिपतिर्वायुःप्रमुमोक्तु अन्यत्पूर्ववत्॥
अथत्रयोविंशीमाह इडायैसृप्तंघृतवच्चराचरं देवाअन्वविंदन्गुहाहितं इडायैगोसंपदनार्थंसृप्तंप्रदी
र्घतत्घृताकारमित्यर्थः तादृशंस्थावरजंगमरूपंजगदनुग्रहीतुंगुहाहितंप्राणिनांबुद्धावस्थितंतंस
महोतदेवंदेवाअन्वविंदन्अन्विष्यलब्धवंतः अथचतुर्दशीमाह यआरण्याःपशवोविश्वरूपाः।
विरूपाःसंतोबहुधैकरूपाः तेषांसप्तानामिहरंतिरस्तु रायस्पोषायसुप्रजास्त्वायसुवीर्यायेति॥

त्रिशि०
॥१६॥

सप्तानां द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटसिंहानां अन्यत्सर्वं तत् इति माधवीये वेदार्थप्रकाशे यजुरारण्य
के तृतीयप्रपाठके एकादशोनुवाकः एतैरेकादशभिरनुवाकैश्चतुर्होत्रीयचयनमंत्रा अभिहिताः अथ नारा
यणनाम्ना पुरुषसूक्तनाम्ना च व्यवह्रियमाणोनुवाक उच्यते तस्य विनियोगो महाग्निचापस्तंबेन आह पुरस्तात्प्रतीचीं
पुरुषाकृतिं चिनोति पुरुषशिरोत्तवति सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते ब्रह्ममे
धेपि प्रेतदाहोपस्थाने विनियोगं भरद्वाज आह नारायणाख्यामुपस्थानमिति अयं चोत्तरश्च तावुभावनुवाकौ
नारायणसंज्ञो नारायणाख्येनैकेन विदुषिणा दृष्टत्वाज्जगत्कारणस्य नारायणस्य पुरुषस्य प्रतिपादकत्वाच्च तत्रा
स्मिन्नष्टादशानुवाके प्रथमामृचमाह सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वा अ
त्यतिष्ठद्दशांगुलमिति सर्वप्राणिसमष्टिरूपो ब्रह्मांडदेहो विराडाख्यो यः पुरुषः सोयं सहस्रशीर्षा सहस्रश
ब्दस्योपलक्षणत्वादनंतैः शिरोभिर्युक्त इत्यर्थः यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहांतःपातित्वा
त्तदीयान्येवेति सहस्रशीर्षत्वं एवमक्षिषु पादेष्वपि योजनीयं स पुरुषो भूमिं ब्रह्मांडगोलकरूपां विश्वतो वृत्वा ॥१६॥
सर्वतः परिवेष्ट्य दशांगुलपरिमितं देशमत्यतिष्ठत् अतिक्रम्य स्थितः दशांगुलमित्युपलक्षणं ब्रह्मांडा
द्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः अथ द्वितीयामाह पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं उतामृ

ति
तत्वस्येशानः यदन्नेनारोहति यद्भूतमतीतं जगत् यच्च भव्यं भविष्यं जगत् यदपीदं वर्तमानं जगत् तत्सर्वं पुरुष एव॥
यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेपि विराट्पुरुषस्यावयवास्तथैवातीतागामिनोपि कल्पयोरपि द्रष्टव्यं उत
अपि च अमृतत्वस्य देवत्वस्यायमीशानः स्वामी यद्यस्मात्कारणादन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेनातिरोह
ति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदव
स्थास्वीकारान्नेदं तस्य वस्तुतत्वमित्यर्थः अथ तृतीयामाह एतावानस्य महिमा अतो ज्यायांश्च पुरु
षः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति अतीतानागतवर्तमानरूपं जगद्यावदस्ति तावत्सर्वोपि
अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः न तु तस्य वास्तवं रूपं वास्तवस्तु पुरुषः अतो महिम्नोपि
ज्यायान् अतिशयेनाधिकः एतच्चोभयं स्पष्टीक्रियते सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि
अस्य पुरुषस्य पादश्चतुर्थांशः अस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं तच्च दिवि द्योतनात्मके
स्वप्रकाशरूपेवतिष्ठते यद्यपि सत्यं ज्ञानमनंतं ब्रह्मेत्याम्नातस्य परब्रह्मण इयत्ताया अभावात्पादचतु
ष्टयं न निरूपयितुं शक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षया अल्पमिति विवक्षितत्वात्पादत्वोपन्यासः
अथ चतुर्थीमाह त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वङ्व्यक्रामत् साशनान

वि॰त्रि॰ रु शनेत्यपि योयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मस्वरूपः सोयमूर्ध्व उदैत् अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतः स
॥१७॥ न्नत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् तस्यायं योयं पादो लेशः सोहमिह मायायां पुनराभवत् सृष्टिसं
हाराभ्यां पुनः पुनरागच्छति अस्य सर्वस्य जगतः परमात्मांशत्वं भगवताप्युक्तं विष्टभ्याहमिदं कृत्स्नमेकां
शेन स्थितो जगदिति ततो मायामागत्यानंतरं विष्वक्‌ देवतिर्यगादिरूपेण विविधः सन् व्यक्रामत् व्याप्तवा
न् किं कृत्वा साशनानशने अभिलक्ष्य साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं अनशनं तद्रहितमचे
तनं गिरिनद्यादिकं तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः अथ पंचमीमाह त
स्माद्विराडजायत विराजो अधि पुरुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुर इति विष्वङ्‌ व्यक्रा
मदिति यदुक्तं देवप्रपंच्यते तस्मादादिपुरुषाद्विराडजायत ब्रह्मांडदेह उत्पन्नः विविधं राजंते वस्तून्य
त्रेति विराट् विराजो अधि विराड्देहस्योपरि स्थितमेव तं देहमधिकरणं कृत्वा पुरुषस्तद्देहाभिमानी क ॥१७॥
श्चित्पुमानजायत योयं सर्ववेदांतवेद्यः परमात्मा स एव स्वकीयमायया विराड्देहं ब्रह्मांडरूपं सृष्ट्वा तत्र
जीवरूपेण ब्रह्मांडाभिमानी देवतात्मा जीवोभवत् एतच्चाप्यथर्वणिका उत्तरतापनीये साधु समाम
नंति स वा एष भूतानींद्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माय

यैवेति स राजा विराट्‌ पुरुषः अत्यरिच्यत अतिरिक्तोभूत् विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोभूत् प
श्चाद्देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः अथो भूमेः सृष्टेरनंतरं तेषां जीवानां पुरः ससर्ज पूर्यंते सप्तभि
धातुभि धीतुभिरिति पुरः शरीराणि अथ षष्ठीमाह यत्पुरुषेण हविषा देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं॥
ग्रीष्म इध्मः शरद्धविरिति पूर्वोक्तक्रमेण देवशरीरेषूत्पन्नेषु ते देवा उत्तरसृष्टिसिद्ध्यर्थं तत्साधनत्वेन यज्ञमन्वत
कं विधयज्ञमन्वतिष्ठन् बाह्यद्रव्यस्याप्यनिष्पन्नत्वेन हविरंतरासंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन सं
कल्प्य तेन पुरुषाख्येन यदा मानसं यज्ञमकुर्वत तदानीमस्य यज्ञस्य वसंतर्तुरेवाज्यमभूत् तमेवाज्यत्वेन संक
ल्पितवंतः एवं ग्रीष्म इध्मत्वेन संकल्पितवंतः शरत्पुरोडाशादिहविष्ट्वेन संकल्पिता पूर्वं पुरुषस्य हविःसामा
न्यरूपत्वेन संकल्पः वसंतादीनां आज्यादिविशेषरूपत्वेनेति द्रष्टव्यं अथ सप्तमीमाह सप्तास्यासन् परिधयः
त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वानाः अबध्नन् पुरुषं पशुमिति अस्य सांकल्पिकस्य यज्ञस्य गाय
त्र्यादीनि सप्तच्छंदांसि परिधय आसन् ऐष्टिकस्याहवनीयस्य त्रयः परिधयः उत्तरवेदिकायास्त्रयः परि
धयः आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः अत एवाम्नायते न पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन् पु
रस्ताद्रक्षांस्यपहंतीति ते आदित्यसहिताः सप्त परिधयोत्र सप्तच्छंदोरूपाः तथा समिधस्त्रिः सप्त त्रिगु
णितसप्तसंख्याकाः एकविंशतिः कृताः द्वादश मासाः पंचर्तवस्त्रय इमे लोकाः असावादित्य एकविंश

वित्रि०
॥१९॥

इति श्रुतः पदार्थः एकविंशतिदारुयुक्तेध्मत्वेन भाविताः यत् यत् पुरुषो वैराजोस्तितं पुरुषं देवाः प्रजापतिप्राणेंद्रिय
रूपाः यत् तन्वानाः मानसं यज्ञं कुर्वाणाः पुरुषं पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवंतः एतदेवाभि
प्रेत्य पूर्वत्र पुरुषेण हविषेत्युक्तं अथाष्टमीमाह तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः तेन देवा अयजं
त साध्या ऋषयश्च ये इति यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन्
प्रोक्षितवंतः कीदृशमिव अग्रतः सर्वसृष्टेः पूर्वं पुरुषजातं पुरुषत्वेनोत्पन्नं एतच्च पूर्वमेवोक्तं तस्माद्विराड
जायत विराजो अधि पुरुष इति तेन पुरुषरूपेण पशुना देवा अयजंत मानसं यज्ञं निष्पादितवंतः के ते देवा
इति तदेवोच्यते साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्राणरूपाः तदनुकूला ऋषयो मंत्रद्रष्टारश्च ये संति
ते सर्वे अयजंत अथ नवमीमाह तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे वायव्यान् आ
रण्यान् ग्राम्याश्च ये इति सर्वहुतः सर्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते सोयं सर्वहुतः तादृशात्पूर्वोक्ता
न्मानसाद्यज्ञात् पृषदाज्यं संभृतं संपादितं दधि चाज्यं चेत्येवमादिभोग्यजातं संपादितमित्यर्थः तथा ॥१९॥
वायव्यान् वायुदेवताकान् लोकप्रसिद्धान् आरण्यान् पशूंश्चक्रे उत्पादितवान् आरण्या हरिणादयः तथा
ये च ग्राम्या अश्वादयस्तान् उत्पादितवान् पशूनामंतरिक्षद्वारा वायुदेवत्वं मंत्रांतरव्याख्याने समा
म्नातं वायवः स्थेत्याह वायुर्वा अंतरिक्षस्याध्यक्षाः अंतरिक्षदेवत्याः खलु वै पशवः वायव एवैना

न्परिददातीति अथ दशमीमाह तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्मात् यजुस्तस्मा
दजायतेति छंदांसि गायत्र्यादीनि स्पष्टमन्यत् अथैकादशीमाह तस्मादश्वा अजायंत ये के चोभयादतः॥
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावय इति अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च ये के ऊर्ध्वाधोभागयोरुभ
योर्दंतयुक्ताः संति ते अप्यश्वाद् अजायंत तथा गावश्चाजाश्चावयश्च ते सर्वे उत्पन्नाः अथ द्वादशीमाह यत्पुरुषं व्यदधुः
कतिधा व्यकल्पयन् मुखं किमस्य कौ बाहू का ऊरू पादावुच्येते इति प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्म
वादिनां प्रश्ना उच्यंते प्रजापतेः प्राणरूपा देवाः यत् यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवंतः तदानीं
कतिधा कतिभिः प्रकारैः कल्पितवंतः अन्यत्स्पष्टं अथ त्रयोदशीमाह ब्राह्मणोस्य मुखमासीत् बाहू राज
न्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेति योयं ब्राह्मणत्वजातिविशिष्टः पुरुषः सोयम
स्य प्रजापतेर्मुखमासीत् मुखादुत्पन्न इत्यर्थः योयं राजन्यः क्षत्रियजातिः स बाहुत्वेन निष्पादितः बाहुभ्या
मुत्पादित इत्यर्थः तदानीं यो प्रजापतेरूरू तद्रूपो वैश्यः संपन्न ऊरुभ्यामुत्पन्न इत्यर्थः तथा पादाभ्यां शूद्रो
मुत्पन्नः इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः सप्तमकांडे स मुखतस्त्रिवृतं निरमिमीत इत्यादौ वि
स्पष्टमाम्नातं अतः प्रश्नोत्तरे उभे अपि तत्परत्वेनैव योजनीये अथ चतुर्दशीमाह चंद्रमा मनसो जा

वि॰ त्रि॰
॥१९॥

तः चक्षोः सूर्योऽजायत मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायतेति यथा दध्याज्यादिद्रव्याणि गवादिपशवः
ऋगादिवेदाः ब्राह्मणादिमनुष्याश्च तस्मादुत्पन्नाः एवं चंद्रादयो देवा अपि तस्मादेवोत्पन्नाः चक्षोः चक्षुषः॥
अथ पंचदशीमाह नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ
अकल्पयन्निति यथा देवास्तस्मादुत्पन्नाः तथा लोकानप्यंतरिक्षादीन् प्रजापतेर्नाभ्याद्यवयवेभ्य अकल्पयन्
उत्पादितवंतः अथ षोडशीमाह वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसस्तु पारे सर्वाणि रूपाणि विचि
त्य धीरः नामानि कृत्वाभिवदन्यदास्ते इति यथोक्तविराट्पुरुषध्यानमंत्र प्रतिपाद्यते तत्र मंत्रद्रष्टा स्वकी
यं ध्यानानुभवं प्रकटयति यत् यः पुरुषः सर्वाणि रूपाणि देवमनुष्यशरीराणि विचित्य विशेषेण निष्पाद्य ना
मानि च देवोऽयं मनुष्योऽयं पशुरयमित्यादीनि कृत्वाभिवदन् तैर्नामभिर्व्यवहरन्नास्ते एवं पुरुषं वि
राजं महांतं सर्वगुणैरधिकं आदित्यवर्णं आदित्यवत्प्रकाशमानं वेद अहं जानामि ध्यानेन सर्वदा अनुभ
वामीत्यर्थः स पुरुषः तमसः पारे अज्ञानस्य परस्ताद्वर्तते अतो गुरुशास्त्ररहितैर्मूढैरनुभवितुमशक्य ॥१९॥
इत्यर्थः अथ सप्तदशीमाह धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशः चतस्रः तमेवं
विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यत इति धाता प्रजापतिः यं विराट्पुरुषमु

दाजहार ध्यातॄणामुपकारार्थं प्रख्यापितवान् चतस्रः प्रदिशः चतुर्दिक्षु वर्तिनः सर्वान् प्राणिनः प्रविद्वान्
प्रकर्षेण जानन् शक्रः इंद्रश्च तदनुग्रहार्थं प्रख्यापितवान् धातुरिंद्रस्योपदेशात् तं विराट्पुरुषमेवमुक्तप्र
कारेण विद्वान् साक्षात्कुर्वन् इहास्मिन्नेव जन्मनि अमृतो मरणरहितो भवति यदा विराट्पुरुषोऽहमिति सा
क्षात्करोति तदानीं वर्तमानदेहस्य तत्स्वरूपत्वाभावात् जन्ममरणेनायमुपासकः न म्रियते अयनाय
अमृतत्वप्राप्तये अन्यः पंथाः यथोक्तविराट्पुरुषसाक्षात्कारमंतरेणान्यो मार्गो न विद्यते नहि कर्मसहस्रै
रमृतत्वं संपादयितुं शक्यते न कर्मणा न प्रजया धनेनेत्यादिश्रुतेः अथाष्टादशीमाह यज्ञेन यज्ञमय
त जं देवाः तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचंते यत्र पूर्वे साध्याः संति देवाः अत्र कृत्स्नानु
वाकतात्पर्यं संक्षिप्योपन्यस्यति देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तय
ज्ञस्वरूपं प्रजापतिमयजंत पूजितवंतः तस्मात्पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारका
णि प्रथमानि मुख्यान्यासन् एतावानस्मत्सृष्टिप्रतिपादको नुवाकस्यार्थः संगृहीतः अथोपासनतत्फ
लरूपानुवाकभागार्थः संगृह्यते यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः विराडुपा
स्तिसाधकाः देवाः संति नाकं विराट्प्राप्तिरूपं स्वर्गं महिमानस्तदुपासकाः महात्मनः सचंते समवयंति प्रा

मुंचंति इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीयप्रपाठकेद्वादशोनुवाकः अथोत्तरनारायणाख्यः
कश्चिदनुवाकः तस्यचविनियोगं पुरुषमेधेआपस्तंबआह उत्तरनारायणेनादित्यमुपस्थायेति तत्रप्रथमा
मृचमाह अद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकर्मणःसमवर्त्तताधि तस्यत्वष्टाविदधद्रूपमेति तत्पुरुषस्य
विश्वमाजानमग्रेइति योयंविराड्रूपोनारायणाख्यपुरुषःसोयमद्भ्यःसंभृतः सर्वतोव्याप्तेषुजलेषुक्षीरम
ध्येमंडलवद्ब्रह्मांडगोलकउत्पन्नःनकेवलमद्भ्यएव किंतुपृथिव्यैरसाच्चभूमेःसंबंधीयोरसःसारस्तस्मादप्यु
त्पन्नःमंडलस्ययोयंघनीभावःसपार्थिवःयेचतन्मध्येद्रवांशास्तआपः यन्नकठिनंसापृथिवीयद्द्रवंतदाप
इतिश्रुतेः विश्वकर्मणोजगत्कर्तुःपरमेश्वरात्अधिसमवर्त्ततआधिक्येननिष्पन्नःयोयंब्रह्मांडाभि
मानीचेतनःपुमान्सोयमीश्वरांशःतस्यविराट्पुरुषस्यरूपंचतुर्दशलोकावयवसंस्थानंविदधत्
निष्पादयन्त्वष्टाविश्वकर्माजगदीश्वरएतिप्रवर्त्तते पुरुषस्यविराडाख्यस्यतद्विश्वंडप्रभृतिदेवम
नुष्यादिरूपंसर्वजगत्अग्रेसृष्ट्यादौआजानंसर्वतउत्पन्नं अथद्वितीयामाह वेदाहमेतंपुरुषंमहां ॥२०॥
तं आदित्यवर्णंतमसःपरस्तात् तमेवंविद्वानमृतइहभवतिनान्यःपंथाविद्यतेयनायेति पूर्ववद्व्या
ख्येयं अथतृतीयामाह प्रजापतिश्चरतिगर्भेअंतः अजायमानोबहुधाविजायते तस्यधीराः

परिजानंतियोनिं मरीचीनांपदमिच्छंतिवेधसइति ब्रह्मांडरूपेगर्भेअंतःमध्येप्रजापतिर्विग्रहवान्सन्नाचरति।
सचवास्तवेनरूपेणसत्यंज्ञानमनंतंब्रह्मेत्येतादृशत्वादजायमानएवतथापिमायिकेनरूपेणबहुधास्थावरजंग
मादिबहुप्रकारोविशेषेणजायते तस्यप्रजापतेर्योनिंजगत्कारणरूपंवास्तवंस्वरूपंधीराधैर्यवंतोयोगेननिः
५ रुद्धेंद्रियाःमहात्मानोजानंति वेधसोविधातारःस्रष्टारस्तमेवोपास्यमरीचीनांमरीच्यत्रिमुख्यानांमह
र्षीणांपदंजगदुत्पादकत्वलक्षणमिच्छंति अथचतुर्थीमाह योदेवेभ्यआतपतियोदेवानांपुरोहितःपू
र्वोयोदेवेभ्योजातःनमोरुचायब्राह्मयइति यःपरमेश्वरोदेवेभ्योदेवार्थमातपतिसर्वत्रप्रकाशते दे
वानांदेवत्वसिद्ध्येतत्तद्धृदयेषुचैतन्यरूपेणप्रविश्याविर्भवति यश्चदेवानांपुरोहितोबृहस्पतिर्बभूव।
बृहस्पतिर्देवानांपुरोहितइतिश्रुतेः यश्चदेवेभ्यःपूर्वोजातःप्रथमभावीहिरण्यगर्भरूपेणोत्पन्नः
हिरण्यगर्भःसमवर्त्तताग्रइतिश्रुतेः तादृशायरुचायरोचमानायस्वयंप्रकाशायब्राह्मयेपरब्रह्म
स्वरूपायब्रह्मणावेदेनप्रतिपाद्यायवानमोनमस्कारोस्तु अथपंचमीमाह रुचंब्राह्मंजनयंतः
देवाअग्रेतदब्रुवन्यस्त्वैवंब्राह्मणोविद्यात् तस्यदेवाअसन्वशेइति देवाःसर्वेअग्रेसृष्ट्यादौ
ब्रह्मविद्यासंप्रदायप्रवर्त्तकाब्राह्मंरुचंपरब्रह्मसंबंधिचैतन्यंजनयंतोविद्ययाप्रादुर्भावयंतःतद्ब्रह्म

त्रि० ॥२९॥ तत्त्वं संबोध्याब्रुवन्वक्ष्यमाणं वाक्यमुक्तवंतः किं तद्वाक्यमिति तदुच्यते हे परमात्मन् यः कश्चिद्ब्राह्मणः
पुमान्त्वामेवं यथोक्तप्रकारेण विद्यात्तस्य ब्रह्मविदः सर्वे देवा वशे आसन् अधीना भवंति स्वयं हि तेषां
देवानामंतर्यामी परमात्मा भवति तस्माद्देवा एतदधीनाः न तु स्वदेवा ईश्वराः एतमेवार्थं वाजसनेयिनो वि-
स्पष्टमामनंति य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत इति आत्मा ह्येषां
स भवतीति अथ यजुरात्मानं कंचिन्मंत्रमाह ह्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपं
अश्विनौ व्यात्तं इष्टं मनिषाण अमुं मनिषाण सर्वं मनिषाणेति ह्रीर्लज्जाभिमानिनी देवता लक्ष्मी-
रैश्वर्याभिमानिनी देवता हे परमात्मन् ह्रीश्च लक्ष्मीश्च ते तव पत्न्यौ भार्यास्थानीये वा अहोरात्रे ते पा-
र्श्वे पार्श्वद्वयस्थानीये नक्षत्राण्याकाशे दृश्यमानानि रूपस्थानीयानि अश्विनौ देवौ तव व्या-
त्तं विवृतं मुखस्थानीयौ तथाविधः को विराट् पुरुषः इष्टं मनसा देयं क्षितं आत्मबोधं मनिषाण अनु- ॥२९॥
मन्यस्व देहीत्यर्थः अमुं लोके दृश्यमानं गवाश्वादिकं मनिषाण प्रपद्यस्व किं बहुना सर्वं मनिषाण
ऐहिकामुष्मिकं दास सर्वं इष्टं देहि इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके त्र-
योदशोऽनुवाकः अथ भर्तृसत्राख्यः कश्चिदनुवाकोऽभिधीयते तस्य च मृत्यवे विहितं इत्यस्मिन्

पशौ नारिष्टहोमानंतरं उपहोमार्थत्वेन विनियोगो द्रष्टव्यः तथा चापस्तंबः मृत्यवे विहितं तत्र भर्ता-
रमुपजुहुयादिति तत्र प्रथमामृचमाह भर्ता सन्ध्रियमाणो बिभर्ति एको देवो बहुधा निविष्टः॥
यदा भारं तंद्रयते स भर्तुं निधाय भारं पुनरस्तमेति योऽयं प्राणाभिमानी देवः सोऽयं भर्ता पोषकः सन्
ध्रियमाणः अंतर्यामिणा परमेश्वरेण स्वयं धार्यमाणः सन् बिभर्ति देहान् धारयति स च स्वरूपकाले
न स्वयमेक एव देवः तत्तच्छरीरे बहुधा शरीरानुसारेण बहुप्रकारो निविष्टो व्यवस्थितः अत एव प्राणविद्या
प्रकरणे तत्तच्छरीरानुसारेण प्राणस्यावस्थितिं कारणा वा आमनंति समः प्लुषिणा समो मशकेन समो नागेन सम एभि-
स्त्रिभिर्लोकैरित्यादि स प्राणो यदा भारं देहरूपं निधाय कंचिदुत्सृज्य तंद्रीमालस्यं प्राप्नोति आयुषोऽवसाने हि तस्या-
लस्यं भवति तदानीं तदा नीभारं देहरूपं निधाय कंचिदुत्सृज्य पुनरस्तमेति अदर्शनं गच्छति यथा देहात्तेः पूर्वमद-
र्शनं गतः तथा देहपातादूर्ध्वमपीत्यभिप्रेत्य पुनरित्युक्तं अथ द्वितीयामाह तमेव मृत्युममृतं तमाहुः सर्धतोभय-
माणो बिभर्ति य एतं वेद सत्येन भर्तुमिति वेदरहस्याभिज्ञाः पुरुषाः तमेव प्राणं भर्तारं तमु गोप्तारमाहुः यं मृत्युमा-
हुः यदा प्राणो देहान्निर्गच्छति तदेव देहो म्रियते अतो मृत्युहेतुत्वान्मृत्युत्वं तथा देहे व्यवस्थिते देहद्वयसहस्यमृतत्व-
हेतुत्वात्तं प्राणममृतमाहुः शरीरस्य स्थापनहेतुत्वात्तमेव प्राणं भर्तारं देहस्य धारयितारमाहुः तथा च कौशी-
तकिनः समामनंति अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तथा तमेव प्राणमन्नस्वीकाराद्-

वित्रि०
॥२२॥

हेतुत्वात्प्राणाधारं पोषकमाहुः तथा च छंदोगा अन्नपानादिस्वीकारसाधनत्वं प्राणस्यामनंतितेन य एवं श्रातियस्त्विवर्तिते
नेतरान्प्राणानवतीति यः पुमानेवं प्राणं सत्येन श्रुतिस्मृत्युदितेन सम्यङ्मार्गेण पर्युध्यानकाले विनिर्धारयितुं विदजा
नाति स उपासकः पुमानुत्कृष्टतः परमेश्वरेणादौ पोषितः ध्रियमाणश्चानेन प्राणवायुना धार्यमाणः सन्विभर्ति स्वय
मितरान्प्राणिनः पोषयितुं समर्थो भवति अथ तृतीयामाह सद्यो जातमुत जहात्येष उतो जरंतं न जहात्येकं उ
तो बहूनेकमहर्जहार अतंद्रो देवः सदमेव प्रार्थ्य इति एष प्राणदेवः स्वतंत्रः सन् सद्यो जातमुत तदानीमेवोत्पन्न
मपि पुरुषं पुरुषमल्पायुषं जहाति परित्यजति एकमन्यं वा कंचित्पुरुषं उतो जरंतं दीर्घेणायुषा जरां प्राप्तमपि
न जहाति एकमहः एकस्मिन्नेव दिने उतो बहूननेकानपि पुरुषान् जहार संहरति सोयं प्राणदेवः सदमेव सर्व
देव अतंद्रः दुःखाशानस्वासमरणामरणबहुमरणविषयव्यापारेषु आलस्यरहितः अतोयं प्रार्थ्यः अस्मा
भिः प्रार्थनीयः उपास्य इत्यर्थः अथ चतुर्थीमाह यस्त्वेदं यत आबभूव संधां च यां संदधे ब्रह्मणैषः रम
ते तस्मिन्नुत जीर्णे शयाने नैनं जहात्यहःसु पूर्वेषु इति यतो यस्मात्कारणात्त्वं प्राण आबभूव आविर्बभूव ॥२२॥
तत्कारणं यः पुमान् वेद जानाति तथा संधां संबंधमपि यो वेद कां इत्याशंक्य इति सैव विशिष्यते एषः प्राणः ब्रह्म
णा आत्मना सह यां संधां संदधे यं संबंधं प्राप्तवान् इत्थमिह देहे वस्तव्यं इत्यं तत्काळमिह वस्तव्यं इत्येतादृशी संधा तां
यो वेद तस्मिन्पुरुषे प्राणाकारं प्राणात्मसंबंधं वाभिजानाने उत जीर्णे शयाने तादृशे पुरुषे जरां प्राप्य शयाने ऽस

त्यपि तत्रायं प्राणो रमते क्रीडते पूर्वेषु पूर्वदिवसैः कर्मभिः संपादितेषु प्रजाः स्व बहुष्वपि दिवसेषु नैनं जहाति एनं जीर्णं पुरुषं स
प्राणो न त्यजति अथ पंचमीमाह त्वामापो अनुसर्वाश्चरंति जानतीः वत्सं पयसा पुनानाः त्वमग्निं हव्यवाहं समिन्ध
त्वं भवतो मातरिश्वा प्रजानामिति हे प्राण त्वां वायुरूपं सर्वा आपोनुसंचरति यत्र वायुः प्रबलं वाति तत्रैव वा[illegible]धीनं सदृ
ष्टिजलं प्रवर्त्तते तत्र दृष्टांतः यथा जानतीः स्वस्ववत्सान्धिज्ञागावः पयसा पुनानाः स्वकीयेन क्षीरेण पोषयंत्यो वत्समनु
संचरंति तद्वदिति द्रष्टव्यं हे प्राण त्वं हव्यवाहं हविषां वोढारं अग्निं समिन्त्से सम्यग्दीपयसि वायुना ह्यग्निर्दीप्यते
तथा त्वमेव मेव मातरिश्वा वायुरूपः सन् प्रजानां भर्त्ता धारयितासि अथ षष्ठीमाह त्वं पशुस्त्वमु वेवासि सोमः॥
त्वद्देवा हवमायंति सर्वे त्वमेकोसि बहूननुप्रविष्टः नमस्ते अस्तु सुहवो मएधीति हे प्राण त्वं यज्ञप्रवर्त्तकत्वेन
यज्ञरूपोसि प्राणस्य वायुरूपता यज्ञप्रवर्त्तकत्वं एतदन्यत्राम्नातं वाता ध्वर्युर्यज्ञं मयुज्यत इति सामथ्यां गोपित्वं
मेव सर्वक्रियाणां वायुप्रेरितत्वात् किंच सर्वे देवाः हवं त्वदीयमाह्वानं प्रतिष्ठायंति आगच्छंति वायुना याग क्रि
यायां प्रवर्त्तितायां हविरर्थं देवाः आगच्छंति किंच देवतारूपेण त्वमेकोसि तथापि बहून्देवाननुप्रविष्टः तत्तदानु
कुल्येन पृथग्रूपाणि धृत्वा तत्र तत्र स्थितः हे प्राण ते तुभ्यं नमोस्तु मे मम सुहवः एधि आकारयितुं सुलभोभव॥
अथ सप्तमीमाह नमो वामस्तु शृणुतं हवं मे प्राणापानावजिरं संचरंतौ ह्वयामि वां ब्रह्मणा तूर्त्तमेतं यो मां
द्वेष्टि तं जहितं सुवानेति अजिरं अजनशीलं गमनस्वभावं शरीरं संचरंतौ सम्यक्प्रवर्त्तयंतौ हे प्राणापानौ वां युवाभ्यां

त्रि०
॥२३॥ नमोस्तु नमस्कारोस्तु मे हवं मदीयमाह्वानं शृणुतं ब्रह्मणा मंत्रेण वां ह्वयामि युवामाह्वयामि त्वं तूर्णमिव शीघ्रमेतं
आगच्छतं युवानात रुणो युवां यः शत्रुर्मां द्वेष्टि तं जहि विनाशयतं अथाष्टमीमाह प्राणापानौ संविदानौ जहितं॥
अमुष्यासुना मा संगसाथां तं मे देवा ब्रह्मणा संविदानौ वधाय दत्तं तमहं हनामिति हे प्राणापानौ वायू संविदानौ प
रस्परमेकमत्यं गतौ जहितं अस्मच्छत्रुं परित्यजतं अमुष्य मदीयशत्रोरसुना प्राणेन मा संगसाथां संगतौ माभूतां
मे ब्रह्मणा मदीयेन मंत्रेण संविदानावेकमत्यं गतौ देवौ प्राणापानदेवौ युवां तं मदीयं शत्रुं वधाय वधार्थं दत्तं मत्सं प्र
यच्छतं तं शत्रुमहं हनामि विनाशयामि अथ नवमीमाह असज्जजान सत आबभूव यं यं जजान स उ गोपो
अस्य यदा भारं तंद्रयते स भर्तुं परास्य भारं पुनरस्तमेतीति असद्व्यक्तं जगत्कारणं जजान प्रथममाका
शात्मनाऽव्यक्तरूपेणोत्पन्नं तस्मात्सतो व्यक्तेन सद्रूपादाकाशाद्वायुरूपो यं प्राण आबभूव आभिमुख्येनोत्प
न्नः स च वायुरूपः प्राणो यं यं देहं मनुष्यादिदेहं जजान उत्पादितवान् स उ स सर्वोपि देहः अस्य प्राणस्य गोपोर
क्षको भवति प्राणो हि शरीरे प्रविश्य शुभं वर्तते यावदायुस्तावंतं कालं तत्रावस्थाय देहरूपं यदा भारं भर्तुं तंद्र
यते धारयितुं मलसो भवति तदानीमेव तं भारं परास्य परित्यज्य पुनरपि देहांतरैः प्रागवस्थायामिवास्तमेति अद ॥२३॥
र्शनं गच्छति अथ दशमीमाह तद्वै त्वं प्राणो अभवः महान्भोगः प्रजापतेर्भुजः करिष्यमाणः यद्देवान्प्राण
यो नवेति यत्यदा त्वं भुजः भोगान् करिष्यमाणः सन् नवदेवान् … वस्थितिं द्रवन्तीन्शय क्षरादीन्दीप्यमानान्प

दार्थान् प्राणयः प्रकर्षेण चेष्टितवानसि तद्वै तदानीमेव त्वं प्राणो अभवः प्राणयतीति प्रकर्षेणा प्राणनामको ऽभूः कीदृशः
त्वं प्रजापतेर्महान् भोगः अत्यंतभोगहेतुः इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके चतुर्दशोनुवा
कः अथ मृत्युसूक्ताख्योऽनुवाकोऽभिधीयते इतिआरभ्य सप्तानामनुवाकानां ब्रह्ममेधे विनियोगं भरद्वाज आह मृ
त्युसूक्तेनानुवाकेनासावादित्यो पश्चान्ने सोमा संगाहनेमी घृष्णावगा वहन्ज्योतिष्मती तिरूपोषणां वितन्संता
नेतिहविराहुतीः प्रयासायस्वाहेति स्रुवाहुतीरिति तत्र मृत्युसूक्तेन प्रथमामृचमाह हरिं हरं तमनुयंति देवाः वि
श्वस्येशानं वृषभं मतीनां ब्रह्मसरूपमनु मेदमागात् अयनं मा विवधीर्विक्रमस्वेति हरिं हरणशीलं प्राणापह
तारं मृत्युदेवं सर्वे देवा अनुयंति आनुकूल्येन गच्छंति न कोपि देवो मृत्युमुल्लंघयितुं क्षमंते कीदृशं हरिं हरंतं
आयुषावसाने प्राणाष्टकस्य पहर्तं त अत एव विश्वस्येशानं सर्वस्य जगतः स्वामिनं मतीनां मननीयानां देवानां मध्ये
वृषभं श्रेष्ठं अस्मिंस्तु कर्मणि सरूपं समानरूपमनुकूलं इदं ब्रह्म मंत्रजातं मामनु यजमानमनु इदं लक्ष्यं अगा
त् अभिमुख्येन प्राप्नोतु अतो हे मृत्यो ब्रह्मणा तुष्टः सन् अयनं मा विवधीः मदीयं मार्गं मा विनाशय किंतु विक्र
मस्व मच्छत्रुविनाशार्थं पराक्रमं कुरु अथ द्वितीयामाह मा छिदो मृत्यो मा वधीः मा मे बलं विवृहो मा प्रमोषीः
प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेमेति हे मृत्यो त्वं मा छिदः मदीयस्य कस्यापि वयवस्य

नि॰ ७ ॥२७॥

ऽदं माकार्षीः मावधीः मम वधमपि माकार्षीः मे मदीयं बलं माविवृहः माविनाशय मा प्रमोषीः अन्यदपि मदीयं ब
ऽदं माकार्षीः मावधीः मम वधमपि माकार्षीः मे मदीयं बलं माविवृहः माविनाशय मा प्रमोषीः अन्यदपि मदीयं ब
स्तु वीर्येण मा अपहर मे मदीयां प्रजां पुत्रपौत्रादिकां मा रीरिषः हिंसितां मा कुरु हे उग्र देव मदीयमायुश्च मा रीरि
षः माविनाशय नृचक्षसं मनुष्येषु प्रख्यातं त्वां हविषा विधेम परिचरेम अथ तृतीयामाह सप्तश्च कमानाय॥
मृत्यु प्रविपानाय वै भयेन प्राणिनां कंपयित्रे प्राणिनो हि मृत्योर्नाम ग्रहणमात्रात् कंपंते अस्मै ईदृशाय मृत्यवे आशाः
सर्वाः दिशः प्रा शृण्वन् शृण्वंति प्राणिनो मृत्युदेवस्य महिमानं प्रकर्षेण शास्त्रेभ्यः शृण्वंति कामेन मृत्योरिच्छ
या पुनर् जनयन् पुनः पुनः अपत्यानि जनयंति मृत्यो प्रतिकूले समुत्पादितान्यपत्यानि तदानीमेव म्रियंते अतो
मृत्युमाराध्य तदिच्छानुवर्तिनो पत्यान्युत्पादयंति अथ चतुर्थीमाह कामेन मे काम आगात् हृदयाद्धृदयं
मृत्योः यदमीषाम् दः प्रियं तदेतूप मामभीति कामेन मृत्योरिच्छया काम आगात् मदीयेऽभीष्टं वस्त्वागा
दागच्छतु मदीयं हृदयं मृत्योर्हृदयात् मृत्युचित्तानुकूल्येन वर्तताम् इति शेषः अतो मृत्योरनुग्रहे सति अमीषाम
दीयानां इंद्रियाणां अदः प्रियं यदिदं वस्त्वभीष्टं तत् स्त्रो माम् अभिलक्ष्य उपसमीपं एतु आगच्छतु अथ पंचमी ॥२५॥
माह परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो
मोत वीरान् इति हे मृत्यो देवं देवयानादितरो यः पंथाः ते स्वः स्वभूतः तं परं पंथानं देवयानादितरं तं मार्गं
अनुपरेहि अनुक्रमेण प्राप्नुहि चक्षुष्मते साधु दर्शिने शृण्वते अस्मद्विज्ञप्तिं श्रोत्रे ते तुभ्यं एकं वचनं ब्रवी
तर

मि नोऽस्मदीयां प्रजां पुत्रादिरूपां मा रीरिषः माविनाशय उत अपि च वीरान् शूरान् भ्रातृन् मा अपि मा रीरिषः अथ ष
ष्ठीमाह प्र पूर्व्यं मनसा वंदमानः नाधमानो वृषभं चर्षणीनाम् यः प्रजानामेकराण् मानुषीणाम् मृत्युं यजे प्रथमजा
मृतस्येति यो मृत्युर्मानुषाणां मनुष्यजातियुक्तानां प्रजानामेकराट् एक एव राजा तादृशं मृत्युमहं यजे पूजयामि।
कीदृशोऽहं मनसा वंदमानः प्रकर्षेण नमस्कुर्वाणः नाधमानः अपेक्षितं फलं याचमानः कीदृशं मृत्युं प्राणिभ्यः
पूर्वकाले भवं चर्षणीनां मनुष्याणां वृषभं कामादिवर्षणक्षमं ऋतस्य प्रथमजां सत्यस्य परब्रह्मणः प्रथमोत्पन्नं
इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके पंचदशोऽनुवाकः अथ सूर्योपस्थाने विनि
योगं मंत्रमाह तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनं उपयामगृहीतोऽसि सूर्याय त्वा भ्रा
जस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वत इति हे सूर्य त्वं तरणिः अंधकारात्तरणहेतुः विश्वदर्शतः विश्वैः स
र्वैः प्राणिभिर्दर्शनीयो ज्योतिष्कृत् सर्वेषु लोकेषु प्रकाशकृदसि विश्वं सर्वं जगत् रोचनं दीप्यमानं यथा भवति
तथा आभासि सर्वतः प्रकाशयसि अग्निष्टोमे यो यम तिर्यास रूपो ग्रहोऽस्ति तादृशं ग्रहं भ्राजस्वते दीप्तियुक्ता
य महिम्नोपेताय सूर्याय त्वां गृह्णामि अत्र स्वं तदर्थं उपयामगृहीतः उपयामेन पृथिवीकार्येण पात्रेण गृही
तोऽसि एष हविर्धानमंडपस्थो ग्रहस्य ग्रहणेऽयं मंत्रो विनियुज्यते इति माधवीये वेदार्थप्रकाशे यजुरारण्य
के तृतीयप्रपाठके षोडशोऽनुवाकः प्रेतवाहनस्थानसमीपवर्तिस्थितजलं प्रक्षिप्यते तेन सेचनेन संगाहनं तत्र वि

त्रित्रिं० स्य वियोगं भरद्वाज आह अथात उत्तरं पितृमेधं व्याख्यास्यामो ब्रह्ममेधं कृत्वा न वसते तथाप्युदाहरंतीह द्विजातीः
॥२६॥ नामपवर्गार्थः तत्वदर्शिभिः तपसोगाद्दृष्टितं पुरुषोत्तमं होतव्यश्च पितृमेधं च संसृत्य विधिपूर्वकः विहितस्तु
ऽग्नौ स तेन क्रतूनामुत्तमः क्रतुरिति तस्य गृहे होतृशिखिमोक्षते सकृत्केन भरणं पत्नीभिरुपसादनं नारायणाख्या
नुसंस्थानं ब्राह्मण एकहोतेति चानुमंत्रणं चित्रं संतानेनेति हविराहुतीः प्रयासाय स्वाहेति स्रुवाहुतीर्गृह्य
सकृत्केनानुग्रहः सनं सौम्या संगाहनं सौर्यपादित्योपस्थानं दशुद्ध्यावगाहनं समानमेतत्पैतृमेधिकं आपवो
दनप्राशनादीन् रं ब्रह्मेत्या न वक्तते तान् साधारणे स्मशाने प्रयुंजीत नानावार्यो हि द्विजातीनामेव यं स्तुते
ब्रह्ममेधः वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॐ
इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके एकविंशोनुवाकः समाप्तः तृतीयः प्रपाठकः ॥
॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॥२६॥